श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

## न्यास विंशतिः

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥

सिद्धं सत् संप्रदाये स्थिर धिय मनघं श्रोत्रियं ब्रह्म निष्ठं
सत् त्वस्थं सत्य वाचं समय नियतया साधु वृत्त्या समेतम् ।
डम्भासूयादि मुक्तं जित विषयि गणं दीर्घ बन्धुं दयालुं
स्खालित्ये शासितारं स्व पर हित परं देशिकं भूष्णुर् ईप्सेत् ॥१

अज्ञान ध्वान्त रोधाद् अघ परिहरणाद् आत्म साम्या वहत्वात्
जन्म प्रद्वंसि जन्म प्रद गरिमतया दिव्य दृष्टि प्रभावात् ।
निष्प्रत्यूह आनृशंस्यात् नियत रसतया नित्य शेषित्व योगात्
आचार्यः सद्भिर् अप्रत्युपकरण धिया देववत् स्यादुपास्यः ॥२

सद् भुद्धिः साधु सेवी समुचित चरितस् तत्व बोध अभिलाषी
शुशृषुस् त्यक्त मानः प्रणिपतन परः प्रश्न काल प्रतीक्षः ।
शान्तो दान्तो । अनसूयुः शरणमुपगतः शास्त्र विश्वास शाली
शिष्यः प्राप्तः परीक्षां कृतविद् अभिमतं तत् त्वतः शिक्षणीयः ॥३

स्वाधीनाशेष सत्ता स्थिति यतन फलं विद्धि लक्ष्मीश मेकं
प्राप्यं नान्यं प्रतीया न च शरणतया कञ्चिदन्यं वृणीयाः ।
एतस् मादेव पुंसां भयमितरद् अपि प्रेक्ष्य मोज्झीस् तदऽज्ञां



rmvenkat@yahoo.com

इत्ये कान्तोपदेशः प्रथममिह गुरोः एकचित्तेन धार्यः ॥४

मोक्षोपायार् हतैवं भवति भव भृतां कस्यचित् क्वाऽपि काले ।
तद्वद् भक्ति प्रपत्त्योर् अधि कृति नियमस् तादृशा स्यान्नियत्या ।
शक्ता शक्तादि तत्तत् पुरुष विषयतः स्थाप्यते तद् व्यवस्था
यच्चाहुस् तद्विकल्पः सम इति कतिचित् तत् फलस्या विशेषात् ॥५

सानुक्रोशे समर्थे प्रपदन मृषिभिः स्मर्यतेऽभीष्ट सिद्ध्यैः
लोकेऽप्ये तत् प्रसिद्धं न च विमति रिह प्रेक्ष्यते क्वापि तन्त्रे ।
तस्मात् कैमुत्य सिद्धं भगवति तु भरन्यास विद्यानुभावम्
धर्म स्थेयाः च पूर्वे स्व कृतिषु बहुधा स्थापयाञ्चक्रु रेवं ॥६

शास्त्र प्रमाण्य वेदी ननु विधि विषये निर्विशङ्कोऽधिकारी
विश्वासस्य अङ्ग भावे पुनरिह विदुषा किं महत्वं प्रसाध्यम् ।
मैवं घोरापराधैः सपदि गुरु फले न्यास मात्रेण लभ्ये
शङ्का पार्ष्णि ग्रहार्हा शमयितुम् उचिता हेतुभिस् तत् तदर्हैं ।ह् ॥७

नेहाभिक्रान्ति नाशो न च विमतिरिह प्रत्यवायो भवेदिति
उल्तं कैमुत्य नीत्या प्रपदन विषये योजितं शास्त्र विद्धिः ।
तस्मात् क्षेत्रे तदर्हं सुविदित समयैर् देशिकैः सम्यगुप्तं
मन्त्राख्यं मुक्ति बीजं परिणति वशतः कल्पते सत्फलाय ॥८

न्यासः प्रोक्तः अतिरिक्तं तप इति कथितः स्वध्वरः चास्य कर्ता
अहिर्बुधन्योपि अन्ववादीद् अगणि दिविषदाम् उत्तमं गुह्य मेतत् ।
साक्षान् मोक्षाय चासौ श्रुत इह तु मुधा बाध शङ्का गुणाढ्ये ।
तन्निष्टो ह्यन्य निष्ठान् प्रभुरति शयितुं कोटि कोट्यं शतोऽपि ॥९

नाना शब्दादि भेदाद् इति तु कथयता सूत्र कारेण सम्यक्

न्यासोपासे विभक्ते यजन हवनवच्छब्द् भेदाद् अभाक्तात्।
आख्या रूपादि भेदः श्रुत इतरसमः किञ्च भिन्नोऽधिकारः
शीघ्र प्राप्त्यादिभिः स्यात् जगुरिति च मधू पासनादौ व्यवस्थाम्॥१०

यत् किञ्चिद् रक्षणीयं तदवन निपुणे न्यस्यतो। अकिञ्चनस्य
प्रस्पष्टं लोक दृष्ट्या अप्यवगमित इह प्रार्थनाद् अङ्ग योगः।
तस्मात् कर्माङ्ग कत्वं व्यपनयति परा पेक्षणा भाव वादः
साङ्गे त्वष्टाङ्ग योग व्यवहृति नयतः षड्विधत्व उपचारः॥११

पञ्चाप्यङ्गान्य पिङ्गाः प्रणिजगु रविना भाव पाञ्चि प्रपत्तेः
कैश्चित् संभावि तत्वं यदिह निगदितं तत् प्रपत्ति उत्तरं स्यात्।
अङ्गेषु् वङ्गित्व वादः फल कथनमिह द्वि त्रि मान्त्रोक्तयश् च
प्राशस्त्यं तत्र तत्र प्रणि दधति ततः सर्व वाक्यैक कण्ठ्यम्॥१२

रक्षा पेक्षा स्वसाह्य प्रणयवति भरन्यास आज्ञादि दक्षे
दृष्टा नाऽत्र प्रपत्ति व्यवहृतिर् इह तन्मेलने लक्षणं स्यात्।
गेहागत्यदि मात्रे निपततु शरणागति अभिख्या उपचारात्
यद्वा अनेकार्थ भावाद् भवति च विविधः पालनीयत्व हेतुः॥१३

आत्मात्मीय स्वरूप न्यस्तम् अनुगतं यावदर्थं मुमुक्षोः
तत्व ज्ञानात्मकं तत् प्रथम मथ विधेः स्यादुपाये समेतम्।
कैङ्कर्याख्ये पुमर्थे अप्यनुषजति तदप्यर्थना हेतु भावात्
स्वा भीष्टानन्य साध्या वधिरिह तु भरन्यास भाग अङ्गि भूतः॥१४

न्यसादेशेषु धर्म त्यजन वचनतः अकिञ्चनाधि क्रियोक्ता
कार्पण्यम् वाऽङ्गमुक्तं भजन वदि तरा पेक्षणं वाऽप्यपोढम्।
दुस्साध एच्छा उद्यमौ वा क्वचिद् उपशमितौ अन्य संमेलने वा
ब्रह्मास्त्र न्याय उक्तस् तदिह न विहतो धर्म आज्ञादि सिद्धः॥१५

आदेष्टुं स्व प्रपत्तिं तदनुगुण गुणा द्यन्वितं स्वं मुकुन्दो
माम् इति उक्त्वा एक शब्दं वदति तदुचितं तत्र तात्पर्यम् ऊह्यम्।
तत् प्राप्य प्रापकैक्यम् सकल फलदतां न्यासतोऽन्यान पेक्षाम्
प्राधान्याद्यम् च किञ्चित् प्रथयति स परं श्रीसखे मुक्त्युपाये१६

स्वाभीष्ट प्राप्ति हेतुः स्वयमिह पुरुषैः स्वीकृतः स्यादुपायः
शास्त्रे लोके च सिद्धः स पुनरुभयथा सिद्ध साध्य प्रभेदात्।
सिद्धोपायस् तु मुक्तौ निरवधिक दयः श्री सखः सर्व शक्तिः
साध्योपायस् तु भक्तिर् न्यसनमिति पृथक् तद्व शीकार सिद्ध्यै॥१७

अत्यन्त अकिञ्चनो अहं त्वदप चरणतः सन्निवृत्तोऽद्य नाथ
त्वत् सेवै कान्त धीः स्यां त्वमसि शरणमित्य ध्यवस्यामि गाढम्
त्वम् मे गोपायिता स्यास् त्वयि निहित भरः अस्मि एवम् इति अर्पितात्मा
यस्मै स न्यस्त भारः सकृदथ तु सदा न प्रयस्येत् तदर्थम्॥१८

त्यक्त्वा उपायान् अपायानपि परमजहन् मध्यमां स्वार्ह वृत्तिम्
प्रायश्चित्तं च योग्यं विगत ऋण ततिः द्वन्द्व वात्यां तितिक्षुः।
भक्ति ज्ञानादि वृद्धिम् परिचरण गुणान् सत् समृद्धिं च युक्तां
नित्यं याचेद् अनन्यस् तदपि भगवतस् तस्य यद्व आप्त वर्गात्॥१९

आज्ञा कैङ्कर्य वृत्तिषु अनघ गुरुजन प्रक्रिया नेमि वृत्तिः
स्वार्हानुज्ञात सेवा विधिषु च शकने यावदिष्टं प्रवृत्तः।
कर्म प्रारब्ध कार्यं प्रपदन महिम ध्वस्त शेषं द्विरूपं
भुक्त्वा स्वाभीष्ट काले विशति भगवतः पाद मूलं प्रपन्नः॥२०

श्रुत्या स्मृत्यादिभिः च स्वयमिह भगवद् वाक्य वर्गैश् च सिद्धां
स्वातन्त्र्ये पारतन्त्र्ये। अप्यनितर गतिभिः सद्भिर् आस्थीयमानाम्

वेदान्ताचार्य इत्थं विविध गुरु जन ग्रन्थ संवाद वत्या
विंशत्या न्यास विध्यां व्यवृणुत सुधियां श्रेयसे वेङ्कटेशः॥२१

संसारा वर्त वेग प्रशमन शुभदृग्देशिक प्रेक्षितोऽहं
संत्यक्तोऽन्यैर् उपायैर् अनुचित चरितेष्वद्य शान्ताभिसन्धिः।
निःशङ्कस् तत्व दृष्ट्या निरवधि कदयं प्राथ्र्य संरक्षकं त्वां
न्यस्य त्वत्पाद पद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि॥ २२

कवितार्किक सिंहाय कल्याण गुण शालिने।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः।

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com